CC-0. In Public Domain. Digitization by eGangotri

श्री पं. मुकुन्दनाथ शर्मा भट्टराई निवेचनकामसन् लिच्छवीर काठ

नेपाल

ॐ

वाचं धेनुमुपासीत

नेपालस्य

[इतिहासप्रधानं विविधविषयविभूषितं मासिकं पत्रम्]



[संस्कृत-साहित्य-परिषत्पत्रिका]

संस्कृत-सन्देशः

प्रथमे वर्षे १— गोरक्षम न्देरम् —सप्तमोऽङ्कः ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्पादकौ—

योगी नरहरिनाथः पं० बुद्धिसागरपराजुली च
मूल्यम् ४।, ४) षाण्मासिकम् २।५०, २॥) मासिकम् ।५०,॥)

वि. संवत् २०१० कार्तिक शुक्लैकादश्याम्
शकसं. १८७५ ने. सं. १०७४

लेखसूची

श्रीभीमसेनस्थापास्तम्भाभिलेखः १
श्री ५ पृथ्वीनारायणसाहदेवोपदेशः २
न्यायरत्नाकरमीमांसाग्रन्थपरिचयः ३
श्रीअमरसिंहस्थापोप्रसिद्धपत्रानुवादः ४
श्रीगरुडनारायणशिलालेखानुवादः ५
श्रीमानदेवजयस्तम्भाभिलेखानुवादः ६
श्रीत्रिरत्नसौन्दर्यगाथा ७
कोतपर्वसम्बन्धिपत्रम् ८
त्रिपुरेश्वरशिलालेखानुवादः ९
दिङ्निर्देशः १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थापाथलीस्थः श्री भीमसेनथापाप्रशस्तिसनाथः

स्तम्भोत्कीर्णोऽभिलेखः

श्रीगणेशाय नमः ॥ श्रीवाग्वत्यै नमः ॥

जननि वाग्वति त्वत्स्तुतीरवाङ्मनसगोचराः कर्तुमीश्वराः ॥
जगति पामरा माद्दशो नराः कथमलंतरामत्र सह्यताम् ॥ १ ॥
जलरुहं जलाज्जायते जलोज्जलरुहं नहि व्याप्तिमत्र ताम् ॥
इति विधेर्हरस्यम्ब भीतिभिः शिवमुखाब्जजा त्वं सती भुवि । २ ।
पशुपतेः स्फुटां त्वां दयामहं जननि वेद्मि यत्त्वामुपागताः ॥
शिवपुरे जना भस्मधारणाः शशिविभूषणा नन्दिवाहनाः ॥ ३ ॥
जलकणैर्युतो मारुतो वहन्नयति शुद्धतां दिग्विदिक्स्थितान् ॥
जननि जन्मिनः पातकात्मनः सुरपुरेन्ततः स्पर्शमात्रतः ॥ ४ ॥
तव जलं समाश्रित्य यो जनः शिशिर आगते कम्पते ततः ॥
स्मरशरव्यथाकम्पनं जनाद्दधत उर्वशीमुख्यनायिकाः ॥ ५ ॥
पतति यज्जले वस्तु तल्लघु किमपि यत्र वाःपूर एति तम् ॥
ननु यतो भवत्यम्ब तत्र किं त्वयि पतज्जनस्त्वेति तं शिवम् । ६ ।
जलगतं च यत्तच्च मज्जति गुरु किलेह यस्त्वज्जले जनः ॥
जननि पातकाद्योघसंचितो भवति मग्न उन्मज्जतीश्वरि ॥ ७ ॥
धनविसर्जनं देवतार्चनं जननि तर्पणं पिण्डपातनम् ॥
तव तटे जनो यत्करोत्ययं भवति तस्य तत्पुण्यमक्षयम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तव जलामृतं हस्तसंभृतं यदिह संततं पीयतेमृतम् ॥
जननि मन्यते तत्र चामृतं जलधिनिःसृतं देवतामृतम् ॥ ९ ॥
तव तटे जवन्यत्र वासतः पशुपतिर्जगन्मुक्तये स्थिराम् ॥
परिहसत्यहो विश्वनाथसत्कृतसुरापगां काशिकावहाम् ॥ १० ॥
तव तटोदरे तीर्थकोटयस्तदुपवर्णने वेद्मि तुर्मुखः ॥
दशशताननः स्यामहं तदा किमु भवेयमीदृक्तु न क्षमः ॥ ११ ॥
पशुपतिः शिवो ज्योतिरीश्वरः सकलसिद्धिदा शुद्धकालिका ॥
विजयते मुदा त्वत्तटे सदा त्वमिह सर्वदात्रेति नाद्भुतम् ॥ १२ ॥
सलिलसन्निधौ दैवयोगतो मृतिमुपागता ये चराचराः ॥
विरहिता अमी कोटिजन्मसंचितमलैर्जन्तीशपत्तने ॥ १३ ॥
शिव जगत्पते पार्वतीपते पशुपते महादेव शंकर ॥
इति सुजल्पतोऽहनिशं मम भवतु त्वत्तटे गङ्गिके स्थितिः ॥ १४ ॥
तव जलेथवा जन्हुजाजले शिव शिवेति वा राम राम वा ॥
मरणसन्निधौ जिह्वका मम वदतु ते स्तुतेरस्य पाठतः ॥ १६ ॥
यदमलाम्बुनो नित्यसेवनं वृजिननाशनं दुःखदारणम् ॥
भवकभावनं मुक्तिकारणं शरणमेमि तां वाग्वतीमहम् ॥ १६ ॥

सूरीन्द्रारामहृदयस्य सुतेन भक्त्या
वाणीविलासविदुषा रचितस्तवोऽयम् ॥
अस्योपरि प्रपठनाद्भवतु प्रसन्ना
श्रीवाग्वती वरनदी निखिलाघहन्त्री ॥ १७ ॥

इति श्रीमन्महाराजाधिराजराज्ञ्याः श्रीललितत्रिपुरसुन्दरीदेव्या आज्ञया रामहृदयपण्डितात्मजवाणीविलासपण्डितकृतं वाग्वती-स्तोत्रम् । शुभम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ श्रीवाग्वत्यै नमः ॥ श्रीवैष्ण(ष्ण)व्यै नमः ॥
यदमलाम्बुनो नित्यसेवनं वृजिननाशनं दुःखदारुणम् ।
भविकभावनं मुक्तिकारणं शरणमेमि तां वाग्वतीमहम् ॥ १ ॥
भक्तैतद्देशभूपाभ्युदयशतकरी कालिका जागरूका
योगी गोरक्षनाथोऽपि च जयति सदा यत्र विघ्नं विनिघ्नन् ।
शूराः सन्ति प्रजाः स्वप्रभुहितनिपुणा न्याययुक्ताः स्वतन्त्राः
सोऽयं गोर्खाभिधानो जगति विजयते कोऽपि रम्यः प्रदेशः ॥ २ ॥
तत्र द्रव्येशसाहो नृपवर उदितः पूर्णसाहोऽस्य पुत्र-
स्तस्य श्रीरामसाहो विरचितविविधश्लाघ्यलोकव्यवस्थः ।
तस्माच्छ्रीडम्बराख्योऽजनि तनयवरस्तत्सुतो ऽभून्महात्मा
नाम्ना श्रीकृष्णसाहो ऽभवदमलयशा रूद्रसाहो ऽस्य सूनुः ॥ ३ ॥
भूपः पृथ्वीपतिस्तत्सुतवर उदभूत्तज्जनिर्वीरभद्र-
स्तस्मात्सत्सिद्धिशाली समजनि नरभूपालसाहोऽवनीशः ।
पृथ्वीनारायणो ऽस्मादुदभवदवनावुद्यदुद्दामकीर्ति-
र्नेपालक्षोणिपालप्रबलरिपुकुले कल्पकालानलाभः ॥ ४ ॥
भूपो भक्तिभरेण योऽल्पवयसि प्राप्यैव वाराणसीं
याञ्चानन्तरमागतौ स्वमहसा मार्गावरोधोद्यतान् ।
हत्वारीन्स्वपुरीं प्रविश्य च नवाकोटाख्यदुर्गं बला-
ज्जित्वा प्राप च काष्ठमण्डपपुरीं संहृत्य कोटीर्द्विषाम् ॥ ५ ॥
तस्मात्सिंहप्रतापोऽजनि नृपतिपतिः पुण्यवान्सत्प्रतापः
प्रादुर्भूतोऽप्यमुष्माज्जगति रणवहादूरराजाधिराजः ।
बालामालावशीलावलयरिपुकुलालोललीलाविलासो-
ल्लासासक्ताचलालीकुचकलशविधिव्यर्थताकर्तृतेजाः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दाता पाताऽनुशास्ता निखिलगुणनिधिर्गानविद्यादिविद्या-
ऽभिज्ञो यः कम्पमाना विपुलभयवशात्पालयन्त्यादरेण ।
प्राक्प्रत्यक्सव्यसव्येतरत उपचरन्तोऽधिपा यस्य विज्ञा
राज्ञामाज्ञां मनोज्ञाः करकमललसत्कुड्मलोल्लासिशीर्षाः ॥ ७ ॥

सौन्दर्यातिशयादमुष्य नृपतेः प्राणाधिकप्रेयसी
श्रीमत्कान्तिमती त्रिलोकविदिता जायाऽभवद्वीक्ष्य याम् ।
एषा कापि सुराङ्गनासु किमियं किं नागकन्यासु वा
कामस्येति रतिः प्रिया किमथवा लोकोऽयमाशङ्कत ॥ ८ ॥

पुत्रं पर्वतचक्रवर्तिनृपतिं सिंहासनाध्यासितं
स्वीयं वीक्ष्य विधाय दाननिकरानङ्के स्थिता स्वामिनः
एषा भागवतार्थमन्तसमये वाणीविलासाद् बुधा-
दाकर्ण्यैव हरिं निधाय हृदये लीना परब्रह्मणि ॥ ९ ॥

ललितत्रिपुरादिसुन्दरी चरमामुष्य नृपस्य सुन्दरी ।
जयति त्रिजगत्सु सुन्दरी भुवि कैलाश इवेशसुन्दरी ॥ १० ॥

स्वाङ्के स्वस्वामिना श्रीगुणवति निहिते भूमिपे पुत्रवर्ये
प्राणानाधाय नारायणचरणमनाः पुण्यकर्माणि नित्यम् ।
कुर्वाणाऽनाथदीनागतिकजनकृपापारवारां निधिः सा
साध्वीनामग्रगण्या जगति विजयते भूमिपालेन्द्रपत्नी ॥ ११ ॥

गीर्वाणोत्तरयुद्धविक्रमनृपः प्रोद्भूत उर्वीभृतः
पुत्रोऽस्माज्जलधेः सुधांशुरिव सद्धामाभिरामोदयः ।
लोकानन्दिकरः प्रचण्डमहसः सार्द्धाब्दको लब्धवान्
यो राज्यं जनकान्निजाज्जगति सज्जन्युव्रजानां मुदे ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्णे दानं मनोज्ञे द्युतिमृतसुकृते धर्मराजेऽर्जुने स-
च्छौर्यं गाम्भीर्यधैर्ये अधिजलधि रवौ तेज आह्लादकत्वम् ।
चन्द्रे भोजे प्रसादं कविजनकवितास्वाद आधाय नूनं
धाञ्छन्नेकत्र धाता स्थिनमिदमखिलं सृष्टवान्द्रष्टुमेतम् ॥१३॥

ज्येष्ठा श्रीसिद्धिलक्ष्मीर्विलसति महिषी यस्य गोरक्षराज-
लक्ष्मीश्चैतद्वयीयं पतिभजनपरा सर्वसाध्वीषु धन्या ।
प्रायो भूयोऽपि भूयोऽद्भुतकलिमहिमोद्भूतभूभारहेतु-
ध्वस्त्यै कृष्णोऽ(ष्णो)वतीर्णोऽयमियमपि मुदे रुक्मिणीसत्यभामा १४

यस्य श्रीभीमसेनः सचिवकुलमणिर्भाति भूपालमौलेः
कस्मिंश्चिद्घोरविघ्ने निपतति विधितो धीरगम्भीरधीर्यः
आवीद्रूपं धियोपद्रवशममकरोत्स्वीययायुष्यहेतो
राज्ञः कीर्त्यै च नानाविधविमलयशोहेतुकर्माणि मन्त्री ।१५।

जरन्नव्यं रम्यं प्रमदवनमध्वादिघटनं
पुरद्वारं वृष्ट्यातपविकललोकाश्रमयुतम् ।
तथा वारुत्खानाभिधमथ सजागद्देवलमिति
प्रसिद्धं गोर्खायामपि नृपगृहं भीमरचितम् ।१६।

यो दक्षं लक्ष्यवेधे रुचिरहरिकथाकर्णनैकाग्रचित्तं
तुङ्गं रिङ्गत्तुरङ्गं व्यधित वशयितुं संप्रवीणं प्रभुं स्वम् ।
बाल्ये नद्यादिबाहुप्रतरणनिपुणं वर्ण्यनानागुणौघं
मन्त्रीन्द्रो भीमसेनः सुकृतचयवशाल्लब्ध आभाति यस्य ॥१७॥

यत्कोधश्रुतिमात्रतोऽप्यरिवधूवृन्दाश्रुधारा वृह-
द्धारा वोपचिता निरीक्ष्य नटति द्राङ्नीलकण्ठावली ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यो मातेव पितेव बन्धुरिव सत्स्त्रीव प्रभौ दासव-
च्चास्ते तत्र निधाय भीमसचिवे राज्यं नृपः क्रीडति ॥१८॥
कश्चिच्चीनपचक्रवर्तिरचितः सन्धिः समृद्धोऽनिशं
यन्मन्त्रान्मनसापि नेच्छति भियाऽऽक्रान्तुं प्रवृद्धोऽप्यरिः।
ताम्रास्योऽमरसिंहमन्त्रिवरतः सोऽग्नि स्थिताद्यत्पितुः
सोऽयं मन्त्रिशिरोमणिर्हितकरो यस्यास्ति सोऽयं नृपः।१९।
स्वाम्यर्थाय हि जीवनं भवति तद्भ्रातर्व्रज त्वं युधी-
त्याज्ञप्तो रणसंमुखे नयनसिंधापा यदीयोऽनुजः ।
स्वप्राणानजहाद्रिपून् भुजबलादाक्रम्य काङ्डाह्वये
कोटे क्लिष्टपथे प्रवेशसमये मन्त्री स यस्यास्त्यसौ ॥ २० ॥
नेपालोऽयमुपद्रवावलिशतस्थानं प्रभुर्बालकः
संरक्ष्यो मम सर्वथा गृहसुखं त्यक्त्वेति भूपालये ।
स्थित्वान्तर्बहिरग्र्यधीविलसितो दृष्टिं प्रदायानिशं
यो जागर्त्ति स भीमसेनसचिवो यस्यानुरक्तोऽस्त्यसौ ॥२१॥
अनुजवखतवारो येन सम्यङ् नियुक्तः
प्रतिपदमवनीशं सावधानोऽवति स्वम् ॥
यमऽमृतरणधीरौ भ्रातरौ भक्तिमन्ता-
वनुसरत उदारौ सोऽस्ति भीमो यदीयः ॥२२॥
लोका जानीत यूयं प्रभुहितकृतये नाऽभवन्नास्ति भावी
नो मन्त्री भीमसेनादपर इह लसद्बुद्धिचातुर्ययुक्तः ॥
तस्माद्भीमो गरुत्मानयमुत हनुमान् सेवितोऽनेन भूपः
कृष्णो(ष्णो)वा राघवोऽवातरदिति कथयत्यत्र वाणीविलासः ।२३।
श्रुत्वा यन्मन्त्रिकर्मादभुतमतिचकितः(स्फूर्ज)जयित्वा स्वभूम्नां
कार्त्स्न्येन द्रष्टुमत्र क्षितितलविवराच्छेष एत्य स्थितः किम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कायव्यूहेन भीमोत्कटकृतिमिषतो मन्य इत्थं हि नो चे-
द्भूकम्पोऽभूद्विदीर्णा धरणिरपि कथं मन्त्रिकृत्यं च शुभ्रम् २४

यत्सचिवं भीमसेनं संमन्त्र्य च वाग्वतीतटे घटनम् ।
सेतोरकृत सुकीर्त्यै श्री ललितत्रिपुरसुन्दरी देवी ।२५।
यस्मिन् सुन्दरसेतुवर्यरचनं श्रीभीमसेनान्वयात्
ताराधीशरु (चा धि)भाति हितकृच्छ्रीलक्ष्मणोपेतता ॥
धैदेहीति वचो जनो धरणिभृद्रामो (नुभा) वात्सदा
लङ्कायादरमेति तत्सुचरितं रामायणं मन्महे ।२६।

पाराघा(रनि)वासिजन्तुनिवहानायासतो निम्नगा-
मेतां मातृकुले तथा पितृकुले भर्तुःकुले संस्थिताः ।
ये ये ते पितरोऽपि दुस्तरभवाम्भोधिं प्रमोदान्विता-
स्तीर्त्वोत्तीर्त्वान्त्विति वाञ्छयाऽकृत वरं सेतुं नृपेन्द्रप्रिया।२७।

पारावारतटस्थलोकवसतिग्रामाभिरामोदयो
वाग्वत्यां विहितेयमालिरुपलावद्धप्रघट्टान्विता ।
राज्ञ्याः श्रीललितादिमत्रिपुरसुन्दर्याः स्फुरत्यद्भुता
मुक्तिश्रीपुररत्नवृन्दविजयोद्यन्ती पताको किल । २८ ।
गीर्वाणोत्तरयुद्धविक्रमनृपायुर्वृद्धिदा लेखनी
दैवी निर्मलभीमसेनमनसो वृत्तिः स्फुटा मूर्तिधृक् ।
कीर्तिः कापि शलाकिका त्रिपुरसुन्दर्य्याः स्वनिश्रेयस-
श्रीपूर्द्वारवरुद्धयोररर्यारुद्घाटिकोद्घाटने । २९ ।
आलङ्कं शतयोजनो जलनिधिर्यो जानकीजानिना
जाघ्यायै तरणाय वानरवरानीकस्य बद्धः पुरा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चित्रं तत्र किमत्र तत्त्रिपुरसुन्दर्य्या स्वभर्त्रादिको-
द्धारायाऽक्रियताऽध्यपारभवधार्निध्येष सेतुर्दृढः । ३० ।

शाके१७३२द्वित्रिमुनीन्दुमानिनि नगोङ्काक्षिक्षमासम्मिते
संवइ १८६८ मास्यधिसिद्धिपौश्न(ष्ण)वणिजे मार्गे गुरोर्वासरे ।
शुक्लैकादशिकान्विते रणवहादूराधिपश्रेयसे
राज्ञीयं मकरोदये कृतवती सेतोः शिलान्यासनाम् । ३१ ।

गीर्वाणोत्तरयुद्धविक्रममहाराजाधिराजाज्ञया
कर्मण्यत्र स भीमसेनसचिवो लक्ष्म्यादिनारायणम् ॥
डिट्ठेति प्रथितं सुकर्मनिपुणं प्राज्ञं नृपाज्ञाकरं
प्राचीनानुचरं न्ययुङ्क्त मतिमान् श्रद्धाभरेण द्रुतम् ॥ ३२ ॥
सुव्वेतिव्यपदेशभाग्द्विजवरः श्रीलोकनाथाह्वयः
पाँडेः सेवनविज्ञयद्रथ इति ख्यातः सुवेदारकः ।
वीरो ज्ञो दलवारसंज्ञकसुवेदारो वरो बुद्धिमान्
सुव्वाः पीहुवराभिधोऽतिनिपुणस्तद्वन्नियुक्ता अमी ॥ ३३ ॥

एतान् पञ्च नियोज्य कर्मनिपुणान् प्राधान्यतः पावके-
ष्वग्नीन्दु १३ '५३ प्रमितैः करैः परिमितं सेतुं दृढं सुन्दरम् ।
कृत्वा सिद्धमिमं प्रभुं नृपवरं तन्मातरं स्वामिनीं
सन्तोष्यास्य स भीमसेनसचिवो व्यज्ञापयत्संस्कृतिम् ॥ ३४ ॥

अथ नरपतिमात्रा दैवतार्चां विधाय
बहुलवसुविसर्गैर्हव्यवाहं सुतर्प्य ।
द्विजसमुदयदीनानाथलोकान्प्रतोष्य
निजपतिपरधामप्राप्तये संस्कृतोयम् ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संव १८ ६८नागर्तुनागावनिपरिकलिते चैत्रिकेकृष्णपक्षे
सप्तम्यां कुम्भगेऽर्के सुरगुरुदिवसे मैत्रभे हर्षणाख्ये।
योगाग्न्ये द्वन्द्वलग्ने ववकरणयुते हैमसिंहध्वजोद्य-
त्कीर्तिस्तम्भाभिरामो नृपतिमहिलया सेतुरुत्सृष्ट एषः।३६।

गीर्वाणोत्तरयुद्धविक्रममहाराजाधिराजाज्ञया
जाता श्रीललितोत्तरत्रिपुरसुन्दर्व्याः परात्मेशितुः।
प्रीत्यै कीर्तिरियं परा विजयतां वाणीविलासस्तुता
कल्पान्तावधि भीमसेनसचिवश्रोद्यत्प्रभावान्विता ॥ ३७ ॥

अतः परं संस्कृतवाणीमजानानामपि भद्रित्यर्थबोधाय स-
एवार्थः संक्षिप्य भाषयो प्रकटीक्रियते

श्री गो र्खा दे श मा प हि ले श्री द्र व्ये श सा ह म हा रा ज
ङ्ग नु भ यो. उ हा प छि उ न का पु त्र श्री पू र्ण सा ह .उ न का
पु त्र सं पू र्ण लो क मा स्थि ति घां ध न्या श्री रा म सा ह.
उ न का पु त्र श्री डं ब र सा ह. उ न्का पु त्र श्री कृ ष्ण सा ह.
उ न्का पु त्र श्री रु द्र सा ह. उ न्का पु त्र श्री पृ थ्वी प ति सा ह.
उ न्का पु त्र श्री धी र भ द्र सा ह. उ न्का पु त्र दे व ता को
प्र सा द पा या का अ ने क सि द्धि ले यु क्त भ या का श्री न र
भू पा ल सा ह. इ नै का पु त्र वा ल्या ध स्थै मा श्री का शी या
त्रा ग रि फि र्दा मा छे क न आ उ न्या चौ की दा र प्र भ ति श
त्रु सै न्य क न क त्त ल ग रि गो र्खा स ह र मा प्र वे श ग र्या.
ए छि नु षा को ट ने. पा ल प्र भृ ति दे श मा रि श्री म हा रा जे
ब हा दू र ष म्से र ज ङ्ग प द वी पा उ न्या श्री पृ थ्वी ना रा य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण सा ह म हा रा जा हु नु भ यो. इ नै का पु त्र प्र जा रं ज न
ग र्दा मा नि पु ण भ या का. श्री सिं ह प्र ता प सा ह म हा रा
जा हु नु भ यो. इ नै का पु त्र अ ति सु न्द र मू र्ति भ या का स
क ल श त्रु को सं हा र ग र्न्या दा ता मा अ ग्र ग ण्य दे श का ब
ड़ा ब ड़ा रा जा वि षे प नि हु कु म च ला उ न्या शस्त्र शा स्त्र सं गी
त तं त्रा दि स क ल वि द्या का नि धा न. श्री र ण ब हा दू र
सा ह म हा रा जा धि रा ज पु त्र ला इ रा ज्य दी क न स्वा मी
हु नु भ यो इ नै का अ त्यं त सौ न्द र्य ले यु क्त भ या का प्रा
ण भं दा प नि प्या रो श्री का न्ति म ती ना म भ या का प त्नी
स्वा मि नी हु नु भ यो. आ फ्ना पु त्र क न प र्व त दे श मा च
क्र व र्ती म हा रा ज हु नु भ या का सिं हा स न मा च ढ्या का
य स्ता दे ष न पा ई क न सं तो ष ले यु क्त भ ई शा स्त्र मो ले-
ड्या का जो जो दा न छ न् ती स वै दा न ग री क न अं त का
ल वि षे प नि आ फ्ना स्वा मी ले सं ग भ ई वा णी वि ला स
प ण्डि त का मु ख दे खि न् सं पू र्ण श्री भा ग व त पु रा ण
का अ र्थ श्र व ण ग री ना रा य ण क न हृ द य वि षे रा खी प
र म धा म मा प्रा प्त हु नु भ यो. इ नै र ण ब हा दू र सा ह म
हा रा जा धि रा ज का. श्री ल लि त त्रि पु र सु न्द री दे वी.
फां छा म हा रा नी हु नु भ यो. ब हु त सौं द र्य ले यु क्त भ या
का. कै ला स वि षे वि रा ज मा न भ या की सा क्षा त् पा र्व
ती ज स्ता. श्री स्वा मी ज्यू ले आ फ्ना का ख मा रा खि दि या
का पु त्र. श्री गी र्वा ण यु द्ध वि क्र म सा ह म हा रा जा धि रा
ज वि षे. प्रा ण रा खी क न ना रा य ण का च र णा र वि न्द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वि षे चि त्त ल गा ई. स र्व दा पु ण्य क र्मै ग र्न्या भ या का. दी न अ ना थ ज स्का ग ति के हि प नि छै न. य स्ता ज न वि षे क रु णा व हु ते ग र्न्या. प ति व्र ता मा अ ग्र ग ण्य भ या का य स्ता सो कां छा म हा रा नी हु नु हुं छ. श्री र ण व हा दू र सा ह म हा रा जा धि रा ज दे षि न् स मु द्र दे षि उ दा या का पू र्ण च न्द्र ले झै स क ल लो क क न अ त्यं त आ ल्हा द न ग र्न्या. डे ढ व र्षै का उमे र मा आ फ्ना पि ता दे षि न्. रा ज्या भि षे क पा या का. क र्ण भ न्दा प नि ब डा दा ता. का म दे व भं दा प नि अ ति सु ं द र. ध र्म रा ज ज स्ता अ ति स त्य वा दी स दा ध र्म क र्मै ग र्न्या. अ र्जु न ज स्ता व डा शू र स मु द्र ज स्ता अ ति ग ंभी र प नि धी र प नि भ या का सू र्य ज स्ता व डा ते ज स्वी. भो ज रा ज भ न्दा प नि क वि ता सु ं दा मा व डो प्र सा द दि न्या इ त्या दि स क ल रा ज गु ण ले यु क्त भ या का. श्री गी र्वा ण यु द्ध वि क्र म सो ह म हा रा जा धि रा ज पै दा हु नु भ यो. ज स्का जे ठा म हा रा नी श्री सि द्धि ल क्ष्मी दे वी हु नु हु न्छ. कां छा म हा रा नी गो र क्ष रा ज ल क्ष्मी दे वी हु नु हुं छ. इ नै म हा रा ज म हा रा नी मा. क लि यु ग का. म हि मा ले. फे री भू मी मा जो जो भा र का का र ण छ न् त न्को वि ना श ग र्ना नि मि त्त. कृ ष्ण जी को अ व ता र म हा रा ज. रु क्मि णी जी को र. स त्य भा मा जी को अ व ता र. ई दु ई म हा रा नी हु न् भ नि लो क य स्तो त कै णा ग र्दै छ न् ज स् म हा रा जा का स क ल मं त्रि वि षे शि रो म णि भ या का भी म से न थो पा का नी छ न्. जो का जी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दै व ध श ले श्री स्वा मी ज्यू को अ क स्मा त् प र लो क हु नु
प हि धो र वि घ्न आं उ दा मा प नि. धी र गं भी र बु द्धि ले
अ क ल उ प द्र ब को नि वा र ण ग रि. श्री म हा रा जा को
र क्षा ग र्न्या. श्री म हा रा जा को आ यु ष्य पु ण्य प्र ता प की
वि रा ज्य ब ढो स् भ ज्ञा नि मि त्त ब हु त दि न दे षि जी र्ण
भ या को भ ड्या र खा ल् क न. अ ने क त र ह का चु ना गि रि
ले ज ग् ज ग् भ या का अ ने क त र ह का फ ल फु ल का वृ क्ष.
औ ष धि ल ता दि ले पू र्ण भ या को अ ति सुं द र तु ल्या उ
न्या. ज ग्गा ज ग्गा मा. बा टो को सं स्का र ग रि स ड क व
ना ड न्या. स ह र का ढो का. ढो का छे उ का पा टी हे रू द र्वा र
को सु न को. ढो का हे रू व ना ई सं स्का र ग र्न्या. घा रू द खा
जा. म जा क् दे ष ल षि श्नु म ती को पू ल. घा री पा री का
श्र र्म शा ला. घा ट् सु न को धा रा. गो र्खा को द र घा र. ह
त्या दि व ना उ न्या. आ पना प्र भु क न घा त्या व स्थै मा. ध
मु हा ञ. ह रि क था श्र व ण ग र्न. घो डा च ढ न. पौ ह न. ह
त्या दि स क ल रा ज नी ति मा कु श ल तु ल्या उ न्या. ज स्का
को ध मा. स ब थ र्थ रा य मा न कां प द छ न्. जो आ पना प्र
भु वि षे म ह ता रि भै. हि त ग र्द छ न्. पि ता भै उ प दे श
को वा र्ता वि ति ग र्द छ न्. बं धु ब र्ग भै स्ने ह ग र्द छ न् स
त्स्त्री भै सु ख दि छ न्. से वा मा दा स भै जो र हं छ न्. ज
स्का मं त्र णा मा नी न का पा त्सा ह सि त को धा हा प नि
वं दो आं छ. ज स्का मं त्र णा ले आ पना घा घा अ म र सिं ह
ज्ञा पा का जी ला इ सि मो ना मो रा ष ना ले ब ढ्या को फि रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गी प नि आ क न श क दे न. ज स्का भा इ न य न सिं ह था पा ले प नि का ङ् डा को ट मा प्र भु का नि मि त्त ल डा झि मा प्रा ण दि या. जो का जी. यो ने पा ल उ प द्र व को घ र हो. प्र भु भ न्या बा ल क. मै ले स ह्या र ग र्न्या हो भ क्ता नि मि त्त गृ ह सु ख छो डि प नि द र बा र मा ब सी मि त्र बा हि र स र्व त्र न ज र दि ख ब र्दा र भै र हं छ न्. ज स् ले ल गा या का भा ई ब ख त बा र सिं ह. को जी श्री म हा रा ज का ह जू रै मा ब सी श्री म हा रा ज को र क्षा रा त दि न ग र्दै छ न्. ज स्का र क्षा नि मि त्त ब डा भ्रा तृ भ क्त भ या का अ मृ त का जी र र ण बी र का जी स र्व दा सा थ र हं छ न्. अ स्का जी ले से बा ग रि या का श्री म हा रा जा वि षे क वि ज्ञ हे रू य स्तो व र्ण न ग र्दै छ न्. श्री म हा रा जा कृ ष्ण जीं का अ व ता र हु न् भ न्या. इ का जी ग रु ड का अ व ता र हु न्. श्री म हा रा जा रा म जी का अ व ता र हु न् भ न्या. ई शा जी ह नू मा न् का अ व ता र हु न भ नि इ त्या दि प्र का र ले व र्ण न ग र्दै छ न्. य स्ता का जी प्र भु को स र्व प्र का र ले हि तै ग र्न्या. ज स् म हा रा जा का प्री ति पा त्र छ न्. ति नै भी म से न था पा का जी सि त स ल्ला हा ग रीश्री ल लि त त्रि पु र सुं द री दे वी ना म भ या का. श्री स्वा मी र ण ब हा दू र साह का कां छा म हा रा नी ले. की र्ति र. श्री स्वा मी ज्यू को उ द्धा र ह ब स् भ क्ता नि मि त. यो बा ग्व ती को पू ल ब ना उ ना क न इ च्छा ग री हु कु म ब क स नु भ यो. बा हा दे षी स क ल रा ज्य को भा र पा या का प्र भु का भ क्त भ या का ब डा बु द्धि मा न् भी म से न था पा का जी ले ए स का म मा ब हु त चि त्त ल गा ई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्ष्मी नारायण डिंडा मुख्य गरी. लोक नाथ पांडे सुब्बा जयद्रथ सुवेदार. दलबार सुवेदार ··· पिंडुवर लामा सुब्बा प्रभृति अनेक मनुष्य कनलगोई शाके १७३२ सम्वत् १८६७ साल का मार्गशीर्ष महिना का शुक्ल पक्ष का एकादशी तिथि रेवती नक्षत्र सिद्धि योग वणिक्करण बृहस्पति वार मकर लग्न माशिलान्यास पूर्वक एक वर्ष मा ते ह श य त्रि प न्न हा त को यो पूल. सुवर्ण सिंह को ध्वज भ या का की र्ति स्त म्भ ले शो भ मा न भ या को बारी पारी धर्मशाला ग्राम हे रु भ या को सिद्ध गरी म हा रा जा म हा रा नी क न सं तु ष्ट ग रा या. बाहा दे षी १८६८ साल का चैत्र कृष्ण स प्त मी बृहस्पति वार अनुराधा नक्षत्र हर्षण योग बव करण मिथुन लग्न मा कुंभ को आदित्य छँदा माय ज्ञ दा न पु ण्य गरी. पुत्र श्री गीर्वाण युद्ध वि क्र म सा ह म हा रा जा धि रा ज ले सँग भ ई श्री ल लि त त्रि पु र सुन्दरी म हा रा नी ले श्री ज ग दीश्वर प्री ति पूर्वक श्री स्वामी ज्यू का उद्धार नि मि त्त बारी पारी धर्मशाला गुठी खेत ले सँग भ या को य स् पूल को उत्सर्ग गर्नु भ यो ॥ शुभ म्भूयादीश्वर प्रसादात् ॥

अत्रैकत्रिंशत्तमस्य श्लोकस्यानन्तरं सप्तत्रिंशत्तमः श्लोक उपलभ्यते, तथैव भाषालेखो ऽप्यंशे खण्डितो वर्तते। इतः सप्तदशवर्षपूर्वमस्यांभिलेखस्य प्रतिलिपिमहमगृह्णाम्। अस्मिन् कर्मणि मम मित्रं माधवप्रसादः साहित्यशास्त्री मम मातृष्वसेयो रामजीश्च मम सहायकमकुरुताम्। स्तम्भं परितः संचितानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्गावयवत्वमापन्नानां पक्वेष्टकाखण्डमृत्तिकादीनामपसारणेनाधोऽवस्थितं लेखमपि गृहीत्वाऽभिलेखप्रतिलिपिं पूरयितुमहं प्रयत्नमकरवम्। आरब्धमात्रे च तस्मिन् प्रयत्ने सरोषा राजपुरुषा मां तस्मात्कर्मणो न्यवारयन्। एकदा कथाप्रसङ्गेन मम मातामहोऽस्याभिलेखस्य चर्चामकरोत्। सपूर्णो लेखो मया नालम्भीति मम वचनं श्रुत्वा सोऽकथयत्। कच्छपपीठोपरि स्तम्भो वर्तते। स्तम्भस्य कच्छपपीठादुपरितने भागे लेखो वर्तते। कच्छपोऽपि संपूर्णाङ्ग उपलभ्यते चेत् लेखस्य का कथा। अहं तु सर्वमपि लेखमपश्यम्। परमियमवस्था श्रीचन्द्रशमशेरकृतात् सेतुसंस्करणात्प्राक्तनी। इदानीं तु नाहं जानामि कीदृशी दशा वर्तत इति। इतो दशैकादशवर्षपूर्वमैतिहासिकशिरोमणिर्वाचस्पति आचार्यो नेपालीभाषाप्रकाशिन्याः समितेः साहाय्येन गृहीतमस्य स्तम्भाभिलेखस्य मुद्रणं मदन्तिकं प्रास्थापयत्। ततः प्रतिलिपिमुद्धर्तुं च मां प्रैरयत्। परन्तु तस्मिन् मुद्रणे ऽप्यधोगतो भागो नासीत्। इदानीमपि साहायकाभावेन सपूर्णाङ्गं लेखं द्रष्टुं दर्शयितुं च नाहमीशोऽस्मि। आशासे कालिकी सा कामना कस्मिंश्चित् दिने सफलीभविष्यतीति।

प्रकाशयितुं प्रहिते चैतावति लेखे संस्कृतसंदेशस्य सम्पादको विद्यारसिको योगी नरहरिनाथः सम्पूर्णाङ्गस्याभिलेखस्य प्रकाशनमेव श्रेयस्करं मत्वोदयुङ्क्त। तस्यैव विद्यारसिकस्य प्रेरणां साहाय्यं सपरिश्रमं संगमनं च लब्ध्वाऽयुष्मान् ज्ञानमणिनेपालो निखाताधोभागावस्थितस्यास्यभिलेखस्य प्रतिलिपिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समानीय मह्यमर्पयत्। अनेन कर्मणा च प्रमुदितान्तरङ्गोऽहं मदीये कर्मणि सख्यमुपेतान् पूर्वोक्तान् जनानभिनन्दामि।

नयराजः पन्तः

राज्ञः श्रीपृथ्वीनारायणस्य स्वान् सभ्यान् प्रत्युपदेशः

[अयमुपदेशो नेपालीभाषायां परम्परीण उपलभ्यते। तस्यैव भावस्य संस्कृतभाषायामनूक्तिरियम्]

क्रमागतः

यावच्छृङ्गाश्रिताध्वं[1] दृढतरघटिता आसतां लोहमय्यो द्वारस्तासां कपाटा न च कठिनतराण्यायसान्येव सन्तु।
यावद्द्वारं शतघ्नोऽहितजनहृदयोत्कम्पिकाः सन्तु नित्यं यावद् द्वारं वसन्तु प्रहरणबहुलाः पञ्चशो[2] द्वारपालाः॥

॥ ७४ ॥

(१) यावन्तः शृङ्गाश्रिताध्वानः। यावदवधारणे २।१।८ यावदनत्रं ब्राह्मणानामन्त्रणस्य। यावत्यमत्राणि सम्भवन्ति पञ्च षड्वा तावत आमन्त्रयस्व (काशिका) अनश्च '५।४।१०८ इति समासान्तष्टच्। (२) संख्यैकवचनाच्च वीप्सायाम् '५।४।४३ इति शस्।

एवं मार्गेषु गुप्तेष्वहितपथजुषः कण्टकत्वं श्रयन्त-श्चारा हिंसा द्रवन्तो[1] वकसमयजुषः[2] श्वेव नालं[3] भवेयुः।
चत्वारः सार्वभौमाः समुदितरसो[4] योगपद्येन युक्ता नेपालं जेतुकामा अपि सफलहृदो नो कदाचिद् भवेयुः॥

॥ ७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(१) पलायमानाः । (२) वकवृत्तयः समय आचारः । (३) अलं समर्थाः । (४) संहतबलाः

भूपः श्रीरामसाहो व्यवृणुत नियमान् यानहं तानपश्यं
राज्ञ्या राजल्लदेव्याः पति[1]रवनिपतिर्यां व्यवस्थां व्यबध्नात् ।
तामेक्षे मल्लवंश्यो धरणिपरिवृढः श्रीमहीन्द्रः स्थितीर्या
लोके प्राप्तप्रतिष्ठा अकुरुत नयने मामके ता अपाताम्[2] ॥७६॥

(१) स्थितिमल्लः "आचीर्णं स्थितिराजमल्लविभुना राजल्लदेव्यासमम्
श्रीलक्ष्मीव्रतमुत्तमं स्थिरधिया सर्वार्थकामप्रदम् । इति
गोपालराजवंशावल्याम् । (२) सादरमपश्यताम् ।

कर्ता[1] द्यावापृथिव्यौ सकलसुम[2]नसामीश्वरोऽनुग्रहेण
दद्या[3]न्मह्यं च कालं करणसमुचितं चेत्तदाऽहं च सम्यक् ।
पूर्वोक्तैर्भूमिपालैस्त्रिभिरपि रचितास्ताः स्थितीः शोधयित्वा
नूत्नां देशोपयुक्तां समयसमुचितां संविदध्यां[3] व्यवस्थाम् ॥७७॥

(१) अत्र तृन् ३।२।१३५। तेनास्य कर्मणि षष्ठ्यभावः । (२) देवानाम् । (३) अस्य श्लोकस्योत्तरैः पञ्चभिः श्लोकैः सम्बन्धः । सर्वत्र च हेतुहेतुमतोर्लिङ् ३।३।१५६।

पूर्वस्यां पश्चिमायामपि च विलसितान् भारताद्भोटदेशं
गन्तॄन् पण्योपजीव्यान् पथ इह विषये सर्वतः सन्निरुध्य ।
नेपालोपत्यकाया अय[1]नमपि सु[2]गं कारयित्वा तदेव
कुर्यां वाणिज्यमार्गं भरतवसुमतीभोटयोर्योजकं च ॥७८॥

(१) मार्गम् । (२) ' सुदुरोरधिकरणे ' इति डः । सुखेन गच्छन्त्यस्मिन्निति=सुगः । (काशिका ३।२।४८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृत्तिच्छेदान्न कश्चिद् भवतु च मनुजो दुःखभाङ् नापि कश्चि-
च्छित्वाऽऽजी[1]वं परेषां निचितबहुधनः पीडयेद्दीनपुंसः।
एवं वर्णव्यवस्था रक्षयति सुगतिं लोकयात्रां ततोऽहं
जात्युक्तं कार्यजातं विदधतु मनुजाश्चेति कुर्यां व्यवस्थाम् ॥७९॥
(१) आजीवो जीविका वार्ता वृत्तिर्वर्त्तनजीवने इत्यमरः २।१०।१

नेपालोपत्यकेयं जननयन[1]सुधां शौर्यविध्वंसकानां
मायानामाकरत्वाद् वहति हि समतां शीतलप्रस्तरस्य।
कूपक्षीरं पिबन्तो जहति हि मनुजा गौरवस्यादिहेतुं
शौर्यं वा बुद्धिमत्तां निजहृदयगतात् सन्ततान्मायिभावात् ॥८०
(१) लोकानां नेत्रे धूलिप्रक्षेपकाणाम्।

तस्माद्वासाय हर्म्यं शिखरिणि दहचोकाभिधाने विदध्यां
तद्धर्म्यं सर्वतोऽन्यांश्च पृथगभिनवान् कारयेयं निका[1]ष्यान्।
आचार्यान्मौललोकं निजकुलजजनान् स्वं महामात्यवर्गं
सेनाध्यक्षांश्च कुर्यां सुविहितवसतींस्तेषु गेहेषु तत्र ॥८१।
(१) गृहान्।

प्रासादेषु त्रिपुर्या विलसनसुभगान् वासरान् यापयेयं
कांश्चित् कुर्यां निवासं नियतमभिनवे पार्वते तत्र हर्म्ये।
एवं वाञ्छा मदीया हृदयकृतपदा दीर्घकालानुवृत्ता
साफल्यं नो प्रयाता मम च तनुरियं दैवगत्या विपन्ना ॥८२॥

नेपालीभाषायां समुपलभ्यमानो मूलपाठः। अयमन्यत्रापि
द्विर्मुद्रितः।

जत्ति भन्ज्याङ् छन् भज्याङ् पिछे यक यक फलामे ढोको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बनाई ढोका पिछे यक यक तोप लमछट गरि राषि दिनु र पपाच सिपाहि राषि दिनु र यस्त भया पछि चेवा गर्न्या चर्चा गर्न्या भागन्या नास्न्या दुकुवा फसादि पुनि यस्ता हरु को पनि केहि चल्ने हैन चारै बादसाहि चढाई गरि आयो भन्या पनि कसै को केहि चलन्य रहेछ छ ॥ उपान्त ॥ राजा रामसाह ले बांध्या को स्थिति पनि हेरि सकें राजा जये थितिमल् ले बांध्या को स्थिति पनि हेरि सकें राजा महिन्द्रमल्ल ले बांध्या को स्थिति पनि हेरि सकें ईस्वर ले दियो भन्या म पनि यस्ता बन्देजको बाहहजारको स्थिति बाधि जाला भन्या अभिलाषा थियो पुरुष पश्चिमको रस्ता बन्दगरि नेपालको रस्ता चलाई दिउला आपना आपना जात विषेषको कर्म गर्नु भन्ने बन्देजगरि जाला यो तिनसहर भन्याको चिस्व हुङ्गो रहे छ पेल पाल मात्रै ठूलोरहेछ कूपको पानि पान्या छैउ बुधि पनि हुँदैन खुरो पनि हुँदैन पेल पाल मात्रै रहेछ मेरो मनसुवा ता दहचोक दरबार बनाउंला र चारै दिशा थर घर को गुरु प्रोहित भैयाद भारादार मिर उमराउ को घर बनाई छुट्टा दरबार बनाउला र यि तिन सहर मा ता दरबार बाह स्वष सयल लाई मात्रै जाला भन्या यस्तो अभिलाष थियो ।

नयराजः पन्तः

टिप्पणी– श्रीमन्महाराजाधिराजे गीर्वाणयुद्धविक्रमसाहदेवे महीं शासति मन्त्रिप्रवरभीमसेनप्रबन्धेन श्रीललितत्रिपुरसुन्दरी-देव्या निबद्धस्यास्य बाग्वतीसेतोर्मूले दक्षिणाभिमुखहैम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिंहध्वजाभिलेखे खल्वत्र पूर्वपृष्ठे ३५ पञ्चत्रिंशत् पङ्क्तयः। दक्षिणपृष्ठे ८८। सप्ताद्यष्टाशीतिः पङ्क्तयः। उत्तरपृष्ठे १०२। सार्धद्व्याधिकशतं पङ्क्तयः। पश्चिमपृष्ठं रिक्तम्। उत्तरे ११ एकादश पङ्क्तयः प्राच्यां च भूमौद्वे निखाते। कमठपृष्ठोपरि १ एकहस्तः स्तम्भः पश्चान्निखातः। ९॥ सार्धसप्तहस्तपर्यन्तं लेखः। अयं सिंहध्वजश्चतुरस्रः। ८ अष्टाङ्गुलयुतं १ कहस्तं स्थौल्यम्। लेखसमाप्तेरुपरि प्रायः ५ पञ्चहस्तायतः। हैमलघुद्रुमसक्तोद्यतदक्षिणभुजः सिंहः। भूमग्नलेखोद्धारे विद्यावनोदप्रियनयराजपन्तशिष्यो ज्ञानमणिनेपालः सहयोगी। खण्डितस्थानानि च पूरितानि। नात्र संशोधितः। ३७ सप्तत्रिंशत् पद्यानि। भावार्थो ऽधस्तात् पृथक्।

योगी नरहरिनाथः

श्री

न्यायरत्नाकरः श्रीचन्द्रविरचितः। मिथिलाक्षरलिखितः

मीमांसाग्रन्थः

ॐ नमो नारायणाय ॥ अत्राचान्तरकार्यतन्त्रतैवाध्यायानु इति श्रीकरः तथाहि कार्यान्यमनुष्ठानमतष्का (तः का) र्यतन्त्रत्वादेव तत्तन्त्रता नान्यथा। तथाकरणस्य प्रयाजादेर्देशादेश्चाभेदात् कार्यस्याङ्गीपूर्वस्य तन्त्रत्वं सुज्ञानं तथा कार्यत एवोत्तरषट्के चिन्तेति न कार्यमनपेक्ष्यानुष्ठानतन्त्रतायाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतः सा कार्यतन्त्रतायाः फलम्. एवञ्च यथा प्रथमानुष्ठानादेव कार्यं सर्वान्य (न्त्यं) जातमिति ज्ञातं तदा कार्याभावात्पुनरनुष्ठानबाधे तस्यान्यस्यानुष्ठानस्य तन्त्रता सिद्धयतीति कार्य तन्त्रता मूलेऽनुष्ठानतन्त्रत्वे हेतु र्भवन् बाधः (ष्का) कार्यतन्त्रत्वे हेतुः याग इव फलभावनानु इति। यच्च विविक्तं कार्यस्यातीन्द्रियत्वात्तन्त्रत्वम् नानुष्ठानतन्त्रतां वनानुष्ठातमतो देशादितन्त्रत्वादनुष्ठानतन्त्रता। ततश्का (काः) र्थ तन्त्रतेति प्राथस्यादनुष्ठानमन्त्रतैवाध्यानुः तदपि निरस्तं कार्यभेदाभेदसन्देहस्यानुष्ठानतन्त्रतावरोधिनः सन्त्वनुष्ठानतन्त्रता क्षेपायोगात् इत्यादि पत्रे। अन्त्ये च अथ विकरणोत्तरं सोमे प्रतिसवनं सवनीयाः पुरोडाशास्तेषु हविष्कृदाह्वानं सहत्वानुग्राहाय तन्त्रमितिप्राप्ते – उच्यते– आवृत्तिः कालभेदादुपपद्यतेऽत्रविशेषः। प्रातः सवनीयानां पुरोडाशानाँ हविष्कृदाह्वानं प्रातः कालं न सवनीयान्तराणाम् तथा वाजपेये क्रतुपशवः प्राजापत्याश्च। तत्राधिगुप्रैषः क्रतुपशूनां तथा हृद् ग्रीवयो. सौम्येन व्यवायात्। पूर्वस्य कृष्णग्रीवस्य पुरोनुवाक्या मनोतावेति प्रैषं भाष्यादावनु मन्येयमिति,

इति महामहोपाध्यायश्रीचन्द्रकृतौ न्यायरत्नाकरे एकादशाध्यायः सम्पूर्णः। ल. सं. २५८ कन्हौ ग्रामे महोपाध्याय श्रारत्नाकरात्मजेन पठता श्रीहरिकरेण लिखितमिदंपुस्तकम्। यथा यथा निरुप्यय जगत्तथा तथा वृथा मुरारिपादसेवनं परं स्थिरं विभावय॥ सदक्षरं ब्रह्म यः ईश्वरः पुमान् गुणोर्मिसृष्टि स्थितिकोलसंलयः। प्रधानबुद्ध्यादिजगत्प्रपञ्चस्रष्टः सवोऽस्तु विष्णुर्मतिमुक्तिमुक्तिदः॥ ॥ गरीयोभिर्विद्वत्परिषदि सद्भोदुगीत·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महिमा महोपाध्यायः श्रीगुणरतिरभूदुपस्य जनकः ॥ असौ चन्द्रः श्रीमानकृत नयरत्नाकरमिमं निबन्धं पोषालीकुलकलमकेदारमिहिरः ॥ शुभम् ॥

श्रीबुद्धिसागरशर्मा.

थापान्वयेनामरसिंहेन महाराजाधिराजाय गोर्वाणयुद्धविक्रमाय प्रहितं पत्रम्

[राजगढदुर्गादमरसिंहेन महाराजाधिराजाय गीर्वाणयुद्धविक्रमाय प्रेषितं पत्रमेतदप्राप्यैव नेपालराजधानीमाङ्ग्लानां हस्तं गतं बभूव । आंग्लभाषायामनूक्तस्य तत्पत्रस्य भारतीयभाषास्वनुवादो लभ्यते । नेपालीभाषायामनुवादोऽम्बिकाप्रसादेन सूर्यविक्रमज्ञवालिना ललितजङ्गसिजापतिना च कृतो वर्तते । तस्यैव संस्कृतभाषायामनूक्तिरियम् ।

गिरिराजचक्रचूडामणौ नारायणात्मनि ।
स्वीयखड्गप्रतापेन सदा विजयशालिनि ॥
महाराजाधिराजे श्रीगीर्वाणयुद्धविक्रमे ।
विज्ञापनैषा क्रियते भक्त्याऽवनतिपूर्विका ॥
चन्द्राद्रिवसुपृथ्वीभि [१८७१]मिते वैक्रमवत्सरे ।
मार्गशीर्षे शुक्लपक्षे एकादश्यां २ गोर्दिने ॥
रक्तया मुद्रया राजचाङ्कितं शासनं स्वकम् ।
समीपे रणजोरस्य प्रेषयामास यद्वु भवान् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सादरं रणजोरोऽपि शिरसा प्रतिगृह्य च ।
गृहीतार्थं शासनं तद् प्राहिणोच्च मदन्तिकम् ॥

तस्मिन्पत्रेऽङ्कितो भावः प्रतिभातीदृशो यथा ।
नालापानीप्रदेशं स्वे वशे संस्थाप्य शत्रवः ॥
जिगीषया प्रेर्यमाणा नाहानमभिचक्रुः ।
इति वार्ता मयालाभि कूर्माद्रिगडवालतः ॥

सेनां संगृह्य रिपवो वारापर्सांप्रदेशतः ।
महोत्तरीं सप्तरीं च यावत्कृतनिवेशनाम् ॥
प्रचक्रिरे वशे स्वीये चूरैर्भूभुदुपत्यकाम् ।
पर्वतीयेष्वरण्येषु यत्र तत्र तिरोहिताः ॥

मदीया आयुधीयाश्च स्वमावासं वितन्वते ।
अभिषेणयितुं पाल्पां सेनापतिपुरस्कृताः ॥
संप्रापुर्गोरखपुरं सैनिकाः परिपन्थिनाम् ।
सेना तथान्या विजयपुरसीमां समाययौ ॥

सेनापतिः प्रतस्थेऽन्यः कलकत्तापुरादिह ।
अपकारं विधित्सुर्न इत्यश्रावि मया कथा ॥
क्षुद्रस्यार्थस्य हेतोश्चाभ्यन्तरालगता जनाः ।
बभञ्जुः संस्थितां मैत्रीं तां राज्यद्वयमन्तरा ॥

तस्मात्सीमासु सर्वासु समीकं संप्रवर्तते ।
आंग्लैः सार्धं बन्धनाय सन्धेः संदेशहारकः ॥
प्रेषणीयस्त्वया नोचेत् सर्वनाश उपस्थितः ।
विधाय सैन्यसन्नाहप्रबन्धं प्रचुरं पुरा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इमे प्रारेभिरेऽस्माभिः सम्परायसरातयः ।
अतो यथेष्टं लाभं स्वं यावन्नाप्स्यन्ति शत्रवः ॥
पणबन्धं तावदेव स्वीकरिष्यन्ति नैव ते ।
तस्मादस्यामवस्थायां सन्धिबन्धाय सर्वथा ॥

उचितं वर्तते तेभ्यो भूमेर्दानं यथेप्सितम् ।
अतो बुटवलः पाल्पाः शिवराजस्तथैव च ।
आयुक्तया परिषदा निर्णीतः कलहास्पदः ।
देयः प्रदेशः शत्रुभ्यः, पर्याप्तामियतीं भुवम् ॥

तथापि यदि मन्येरन् नहि ते परिपन्थिनः ।
अन्योन्यं सन्धिबन्धाय देया चूरेमहीभृतः ॥
सकलापत्यकाभूमिर्देहरादून इत्यपि ।
महाभारतशैलस्य स्थिता दक्षिणतश्च भूः ॥

तथापि शैलभूभागमलब्ध्वा श्वेतदेहकाः ।
सतुष्येयुर्न चेत् तर्हि देहरादूनभूमितः ॥
आशतद्रोभुवो दानेऽधिकारस्तव वर्त्स्यति ॥
यथाविधेन कार्येण सन्धिः सौहार्द्यमेव च ॥

संजायते मिथो भूयस्तत् त्वया संविधीयताम् ।
त्वया कृताः प्रबन्धा मे भविष्यन्ति च सम्मताः ॥
यदि सन्धेरुपायं त्वं विधातुं नहि शक्नुयाः ।
आदिस्टातटिन्नीतीरादाशतद्रु ततस्य च ॥
राज्यस्य मामकीनस्य भवेदु रक्षा सुदुष्करा ।
मध्येराज्यं स्थापयेयुः पादं प्रत्यर्थिनो यदि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सीमयोरुभयो रक्षा तर्हि जायेत दुष्करा ।
पश्चादपसृतिं कृत्वा सार्धं सैन्यैश्च साधनैः ॥
अन्येनैव प्रकारेण कर्तव्यं युद्धमित्यपि ।
त्वं निश्चिनोषि चेत् कर्तुं तच्च शक्नोषि सर्वथा ।
तस्य हेतोः प्रतिच्छां तैर्नियुक्तैः सकलैरपि ॥
योद्धृमुख्यैः संगमनं तव श्रेयस्करं भवेत् ॥
यस्मिन् देशस्य भूभागे वयं सुविहितासनाः ।
आनेपालं स्वविषयं शक्नुमः परिरक्षितुम् ।
इति संजायते स्वान्ते संकल्पः सुदृढस्तव ॥
तत्रैवापसर स्थाने समवेतो जनैः स्वकैः ।
त्वया कार्ये विधौ शिष्टिरियमेव विभोज्यताम्
(अस्मिन् निदेशे भवतो वक्तव्यं श्रूयतां मम ।)

पूर्वोक्तैरनुवादकैरनूक्तं तत्पत्रं संशोधनपूर्वकं पुनः प्रकाश्यते

उप्रान्त (वि. सं १८७१) मार्ग शुदि ११ रोज ६ मा हजूरबाट रणजोरसिंहकहाँ पठाइवक्सेको लालमोहर उसले शिर चढाई म छेउपठाइदियौं। नालापानी दख्खल गरी नाहानतिर वैरी बढ्यो भन्या समाचार कुमाउ गढवालबाट हामीले पायौं। वैरीले पल्टन हुली बारां पर्सादेखि सप्तरी महोत्तरीसम्म तराइ पनि दख्खल गऱ्यो। हाम्रा पल्टन पहाडका जङ्गलमा ठाउँ ठाउँमा लुकेर बस्याका छन् पालपा हाल्न भनेर एक जना जर्नेलका तैनाथमा एउटा पल्टन गोरखपुर आइपुग्याको छ। अर्को पल्टन विजयपुरका सांधमा पुगिसक्याको छ। कलकत्ताबाट एउटा जर्नेल हाम्रो विगार गर्नाका लागि यसतर्फ हिंडिसक्यो भन्ने खबर पनि हामीले सुन्यौं। तुच्छ कुराका निमित्त दुई दुङ्गाका दोस्तीलाई

